# ॥ श्रीविठ्ठलस्तोत्रम् ॥

ॐ अस्य श्रीविठ्ठलस्तवराज स्तोत्र महामन्त्रस्य भगवान् वेदव्यासो ऋषिः अतिजगती छन्दः श्री विठ्ठलः परमात्मा देवता त्रिमूर्त्यात्मक इति बीजं सृष्टिसंरक्षणार्थेति शक्तिः वरदाभयहस्तेति कीलकं श्रीविठ्ठल प्रीत्यर्थे जपे विनियोगः ॥

अथ न्यासः

ॐ नमो भगवते विठ्ठलाय - ॐ तत्त्वप्रकाशिने - ॐ शंखचक्रगदाधरात्मने - ॐ सृष्टिसंरक्षणार्थाय - ॐ त्रिमूर्त्यात्मकाय - ॐ वरदाभयहस्ताय ॥

ध्यानम्

श्रीगुरुं विठ्ठलानन्दं परात्परजगत्प्रभुम् ।
त्रैलोक्यव्यापकं देवं शुद्धमत्यन्तनिर्मलम् ॥
नासाग्रेऽवस्थितं देवमाब्रह्मस्तम्बसंयुतम् ।
ऊर्णतन्तुनिभाकारं सूत्रज्ञं विठ्ठलं स्वयम् ॥
गङ्गायमुनयोर्मध्ये त्रिकूटं रङ्गमन्दिरम् ।
ज्ञानं भीमरथीतीरं स्वदेहं पण्डरीपुरम् ॥
रुक्मिणीशक्तिहस्तेन क्रीडन्तं चललोचनम् ।
आज्ञाब्रह्मबिलान्तस्थ ज्योतिर्मयस्वरूपकम् ॥
सहस्रदलपद्मस्थं सर्वाभरणभूषितम् ।

सर्वदेवसमुत्पन्नं ओमिति ज्योतिरूपकम् ॥

समपर्वत ऊर्ध्वस्थं श्रोणित्रयसहस्रकम् ।

स्तम्भमध्यं यथास्थानं कलौ वेङ्कटनायकम् ॥

पीतवस्त्रपरीधानं तुलसीवनमालिनम् ।

शंखचक्रधरं देवं वरदाभयहस्तकम् ॥

ऊर्ध्वपुण्ड्रमयं देवं चित्राभरणभूषितम् ।

रत्नसिंहासनासीनं सुवर्णमकुटोज्ज्वलम् ॥

रत्नकिङ्किणिकेयूरं रत्नमण्टपशोभितम् ।

पौण्ड्रं च पालिनं रङ्गं यदूनां कुलदीपकम् ॥

देवारिदैत्यदर्पघ्नं सर्वलोकैकनायकम् ।

एवं ध्यायेन्महाविष्णुं विठ्ठलानन्दमव्ययम् ॥

स्तोत्रम्

ॐ नमश्शान्तिरूपाय सर्वलोकैकसिद्धये ।

सर्वमन्त्रस्वरूपाय विठ्ठलाय नमो नमः ॥

सर्वदेवस्वरूपाय सर्वयन्त्रस्वरूपिणे ॥

सर्वतन्त्रस्वरूपाय विठ्ठलाय नमो नमः ॥

परमन्त्रप्रणाशाय परयन्त्रनिवारिणे ।

परतन्त्रविनाशाय विठ्ठलाय नमो नमः ॥

परात्परस्वरूपाय परमात्मस्वरूपिणे ।

परब्रह्मस्वरूपाय विठ्ठलाय नमो नमः ॥

विश्वरूपस्वरूपाय विश्वव्यापकरूपिणे ।

विश्वम्भरस्वमित्राय विठ्ठलाय नमो नमः ॥

परमहंसस्वरूपाय सोऽहं हंसस्वरूपिणे ।

हंसमन्त्रस्वरूपाय विठ्ठलाय नमो नमः ॥

अनिर्वाच्यस्वरूपाय अखण्डब्रह्मरूपिणे ।

आत्मतत्त्वप्रकाश्याय विठ्ठलाय नमो नमः ॥

क्षराक्षस्वरूपाय अक्षराय स्वरूपिणे ।

ओङ्कारवाच्यरूपाय विठ्ठलाय नमो नमः ॥

बिन्दुनादकलातीत भिन्नदेहसमप्रभ ।

अभिन्नायैव विश्वाय विठ्ठलाय नमो नमः ॥

भीमातीरनिवासाय पण्डरीपुरवासिने ।

पाण्डुरङ्ग्प्रकाशाय विठ्ठलाय नमो नमः ॥

सर्वयोगार्थतत्त्वज्ञ सर्वभूतहितेरत ।

सर्वलोकहितार्थाय विठ्ठलाय नमो नमः ॥

फलश्रुतिः

य इदं पठते नित्यं त्रिसन्ध्यं स्तौति माधवम् ।

सर्वयोगप्रदं नित्यं दीर्घमायुष्यवर्धनम् ॥

सर्वे ज्वरा विनश्यन्ति मुच्यते सर्वबन्धनात् ।

आवर्तन सहस्रस्तु लभते वाञ्छितं फलम् ॥

य इदं परमं गुह्यं सर्वत्र न प्रकाशयेत् ।

स ब्रह्मज्ञानमाप्नोति भुक्तिं मुक्तिं च विन्दति ॥

सर्वभूतप्रशमनं सर्वराजवशीकरम् ।

अलक्ष्मीनाशनं चैव सुलक्ष्मीसुखदायकम् ॥

त्रिसन्ध्यं पठते भक्त्या निर्भयो भवति ध्रुवम् ।

सङ्ग्रामे संकटे चैव विवादे शत्रुमध्यगे ॥

शृङ्खलाबन्धने चैव मुच्यते सर्वकिल्बिषात् ।

राजद्वारे सभास्थाने सिंहव्याघ्रभयेषु च ।

साधकः स्तम्भने चैव सर्वत्र विजयी भवेत् ॥

॥ इति वामकेश्वरतन्त्रे नारदवसिष्ठसंवादे श्रीविठ्ठलस्तवराज स्तोत्रम् ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]